पीत्वा क्षीरं क्षौद्रयुतं नाशयेद्धृदयरुग्जम् ॥
अटरूषकमूलेन भगं नाभिञ्च लेपयेत् ।
सुखं प्रसूयते नारी नात्र कार्य्या विचारणा ॥
शर्करा मधुसंयुक्ता पीता तण्डुलवारिणा ।
रक्तातिसारशमनं भवतीति वृषध्वज !” ॥
इति गारुड़े १८६ अध्यायः ॥ * ॥

हरिरुवाच ।

“मरीचं शृङ्गवेरञ्च कुटजत्वचमेव च ।
पानाच्च ग्रहणी नश्येत् शशाङ्ककृतशेखर ! ॥
पिप्पलीं पिप्पलीमूलं मरीचं तगरं वचाम् ।
देवदारुरसं पाठां क्षीरेण सह पेषयेत् ॥
अनेनैव प्रयोगेण अतीसारो विनश्यति ॥
मरीचतिलपुष्पाभ्यामञ्जनं कामलापहम् ।
हरीतकीसमगुड़ा मधुना सह योजिता ।
विरेचनकरी रुद्र ! भवतीति न संशयः ॥
त्रिफला चित्रकं चित्रं तथा कटुंकरोहिणी ।
ऊरुस्तम्भहरो ह्येष उत्तमन्तु विरेचनम् ॥
हरीतकीं शृङ्गवेरं देवदारु च चन्दनम् ।
क्वाथयेच्छागदुग्धेन अपामार्गस्य मूलकम् ॥
जङ्घाशूलमूरुस्तम्भं सप्तरात्रेण नाशयेत् ॥
नाटाञ्च शृङ्गवेरञ्च सूक्ष्मचूर्णानि कारयेत् ॥
गुग्गुलं गुड़तुल्यञ्च गुलिकामुपयुज्य तु ।
वायुं स्नायुगतञ्चैव अग्निमान्द्यञ्च नाशयेत् ॥
शङ्खपुष्पीं तु पुष्येण समुद्धृत्य सपत्रिकाम् ।
समूलीं छागदुग्धेन अपस्मारहरां पिबेत् ॥
अश्वगन्धाभये चैव उदकेन समं पिबेत् ।
रक्तपित्तं विनश्येत नात्र कार्य्या विचारणा ॥
हरीतकीकुष्ठचूर्णं कृत्वा आस्यञ्च पूरयेत् ।
शीतं पीत्वाथ पानीयं सर्व्वच्छर्द्दिनिवारणम् ॥
गुड़ूची पद्मकारिष्टं धन्याकं रक्तचन्दनम् ।
पित्तश्लेष्मज्वरच्छर्द्दिदाहतृष्णाघ्नमग्निकृत् ॥
ॐ क्रूँ नम इति ।
श्रोत्रे बद्धा शङ्खपुष्पीं ज्वरं मन्त्रेण वै हरेत् ।
ॐ जम्भनि स्तम्भनि विमोहय सर्व्वव्याधीन् मे
वज्रेण ठ ठ सर्व्वव्याधीन् मे वज्रेण फट् । इति ॥
पुष्पमष्टशतं जप्त्वा हस्ते दत्त्वाथ न स्पृशेत् ।
चातुर्थको ज्वरो रुद्र ! अन्ये चैव ज्वरास्तथा ॥
जम्बूफलं हरिद्रा च सर्पस्यैव च कञ्चुकम् ।
सर्व्वज्वराणां धूपोऽयं हर ! चातुर्थकस्य च ॥
करवीरं भृङ्गपत्रं लवणं कुष्ठकर्कटम् ।
चतुर्गुणेन मूत्रेण पचेत्तैलं हरेच्च तत् ॥
पामां विचर्च्चिकां कुष्ठमभ्यङ्गाद्धि व्रणानि वै ।
पिप्पलीमधुपानाच्च तथा मधुरभोजनात् ॥
प्लीहा विनश्यते रुद्र ! तथा शूरणसेवनात् ॥
पिप्पलीञ्च हरिद्राञ्च गोमूत्रेण समन्विताम् ॥
प्रक्षिपेच्च गुदद्वारे अर्शांसि विनिवारयेत् ।
अजादुग्धमार्द्रकञ्च पीतं प्लीहापहं भवेत् ॥
सैन्धवञ्च विड़ङ्गानि सोमराजी तु सर्षपाः ।
रजनी द्वे विषाञ्चैव गोमूत्रेण च पेषयेत् ॥
कुष्ठनाशश्च तल्लेपान्निम्बपत्रादनात्तथा” ॥
इति गारुड़े १८७ अध्यायः ॥ * ॥

हरिरुवाच ।

“रजनीकदलीक्षारलेपः सिध्मविनाशनः ।
कुष्ठस्य भागमेकन्तु पथ्याभागद्वयं तथा ॥
उष्णोदकेन संपीत्वा कटिशूलविनाशनम् ।
अभया नवनीतञ्च शर्करा पिप्पलीयुतम् ॥
पानादर्शोहरं स्याच्च नात्र कार्य्या विचारणा ।
अटरूषकपत्रेण घृतं मृद्वग्निना पचेत् ॥
चूर्णं कृत्वा तु लेपोऽयं अर्शोरोगहरः परः ।
गुग्गुलुं त्रिफलायुक्तं पीत्वा नश्येत् भगन्दरम् ॥
अजाजीं शृङ्गवेरञ्च दधिमण्डेन पाययेत् ।
लवणेन तु संयुक्तं मूत्रकृच्छ्रविनाशनम् ॥
यवक्षारः शर्करा च मूत्रकृच्छ्रविनाशनम् ॥
चिताग्निः खञ्जरीटस्य विष्ठा फेनो हयस्य च ।
शोभाञ्जनं चासनेत्रं नर एतैस्तु धूपितः ।
अदृश्यस्त्रिदशैः सर्व्वैः किं पुनर्मानवैः शिव ! ॥
तिलतैलं यवान्दग्ध्वा मसिं कृत्वा तु लेपयेत् ।
तेनैव सह तैलेन अग्निदग्धः सुखी भवेत् ॥
लज्जालुः शरपुंखा च लेपः साज्यो हरामिह ।
पद्माङ्कं कनकं गृह्य श्लक्ष्णचूर्णन्तु कारयेत् ॥
दुग्धं धूपं तत्र दत्त्वा तत्क्षणात् पतते ध्रुवम् ।
ॐ नमो भगवते छिन्द छिन्द ज्वरस्य शिरः
प्रज्वलितपरशुपाणिपुरुषाय फट् ।
करे बद्धा तु निर्गुण्ड्या मूलं ज्वरहरं ततः ।
मूलञ्च श्वेतगुञ्जायाः कृत्वा तत् सप्तखण्डकम् ॥
हस्ते बद्धं नाशयेच्च अर्शांस्येव न संशयः ॥
विष्णुक्रान्ताजमूत्रेण चौरव्याघ्रादिरक्षणम् ।
ब्रह्मदण्ड्यास्तु मूलेन सर्व्वकर्म्माणि कारयेत् ॥
त्रिफलायास्तु चूर्णन्तु साज्यं कुष्ठं विनाशयेत् ॥
आज्यं पुनर्णवाविल्वैः पिप्पलीभिश्च साधितम् ।
हरेत् हिक्काश्वासकासं पीतं स्त्रीणाञ्च गर्भकृत् ॥
भक्षयेच्चैवमादीनि पयसाज्येन पाचितम् ।
घृतशर्करया युक्तं शुक्रं स्यादक्षयं ततः ॥
विड़ङ्गं मधुकं पाठां मांसीं सर्ज्जरसन्तथा ।
हरिद्रा त्रिफलाञ्चैव अपामार्गं मनःशिलाम् ॥
उडुम्बरं धातकीपुष्पं तिलतैलेन पेषयेत् ।
योनिं लिङ्गञ्च म्रक्षेत स्त्रीपुंसोः स्यात् प्रियं मिथः ॥
पुनर्णवामृता दूर्व्वा कनकं चेन्द्रवारुणी ।
वीजेनैषां जातिकाया रसेन रसमर्दनम् ॥
कृत्वा धमेच्च मूषायां रसमारणमीरितम् ॥
मध्वाज्यसहितं दुग्धं वलीपलितनाशनम् ॥
मध्वाज्यं गुड़ताम्रञ्च करेणमाक्षिकं रसम् ।
धमनाच्च भवेद्दीप्यं सुवर्णकरणं भृशम् ॥
पीतं धुस्तूरपुष्पञ्च सीसकस्य पलं मतम् ।
पांठा लाङ्गलशाखा च मूलमावर्त्तनाद्भवेत् ॥
तैलं धुस्तूरवृक्षस्य तेन दीपं प्रदापयेत् ।
समाधावुपविष्टन्तु गगनस्थो न पश्यति ॥
रात्रौ च सार्षपं तैलं कर्णं खद्योतसम्भवम् ।
तद्दीपः प्रज्वलेत् सम्यक् अग्निज्वालाकलापवत् ॥
कुञ्जरस्य मदार्त्तस्य स्वयं नेत्रे शिवाञ्जयेत् ।
संग्रामं जयते सोऽपि महाशूरश्च जायते ॥
दन्तं दुण्डुभसर्पस्य मुखे संगृह्य वै क्षिपेत् ।
तिष्ठते जलमध्ये तु निर्विकल्पं स्थले यथा ॥
कुम्भीरनेत्रदंष्ट्राणि सास्थीनि रुधिरं तथा ।
वशातैलसमायुक्तमेकत्र तन्नियोजयेत् ॥
आत्मानं म्रक्षयेत्तेन जले तिष्ठेद्दिनत्रयम् ।
कुम्भीरकस्य नेत्राणि हृदयं कच्छपस्य च ॥
मूषकस्य वशास्थीनि शिशुमारवशा तथा ।
एतान्येकत्र संस्थानि जले तिष्ठेत् यथा गृहे ॥
लोहचूर्णं तक्रपीतं पाण्डुरोगहरं भवेत् ।
तण्डुलीयकगोक्षुरमूलं पीतं पयोऽन्वितम् ॥
कामलादिहरं प्रोक्तं मुखरोगहरं तथा ।
जातीमूलं तक्रपीतं कोलिमूलन्तु जीर्णकृत् ॥
सतक्रकाशमूलं वा वाकुचीमूलमेव वा ।
काञ्जिकेन च वाकुच्या मूलं वै दन्तरोगनुत् ॥
अथेन्द्रवारुणीमूलं वारिपीतं विषादिहृत् ।
बला चातिबला यष्टी शर्करा मधुसंयुता ॥
बन्ध्यागर्भकरं पीतं नात्र कार्य्या विचारणा ॥
श्वेतापराजितामूलं पिप्पलीशुण्ठिसंयुतम् ।
परिपिष्टं शिरोलेपात् शिरःशूलविनाशनम् ।
शिरोरोगहरं लेपात् गुञ्जामूलं सकाञ्जिकम् ॥
निर्गुण्डिकाशिफां पीत्वा गण्डमालाविनाशनम्
केतकीपत्रजं क्षारं गुड़ेन सह भक्षयेत् ॥
तक्रेण शरपुङ्खां वा पीत्वा प्लीहां विनाशयेत् ॥
मातुलुङ्गस्य निर्यासं गुड़ाज्येन समन्वितम् ।
वातपित्तजशूलानि हन्ति वै पानयोगतः ।
शुण्ठीं सौवर्च्चलं हिङ्गु पीत्वा हृदयरोगनुत्” ॥
इति गारुड़े १८८ अध्यायः ॥ * ॥

हरिरुवाच ।

ॐ गं गणपतये स्वाहेति ।
“अयं गणपतेर्मन्त्रो धनविद्याप्रदायकः ।
इममष्टसहस्रञ्च जप्त्वा बद्धा शिखान्ततः ॥
व्यवहारे जयः स्याच्च शतं जाप्यान्नृणां प्रियः ।
तिलानान्तु घृताक्तानां कृष्णानां रुद्र ! होमयेत् ॥
अष्टोत्तरसहस्रन्तु राजा वश्यस्त्रिभिर्दिनैः ।
अष्टम्याञ्च चतुर्दश्यामुपोष्याभ्यर्च्य विघ्नराट् ॥
तिलाक्षतानां जुहुयादष्टोत्तरसहस्रकम् ।
अपराजितः स्याद्युद्धे च अथ चेदुद्यमे शिव ! ॥
जप्त्वा चाष्टसहस्रन्तु ततश्चाष्टशतेन च ।
शिखां बद्धा राजकुले व्यवहारे जयो भवेत् ॥
ह्रीकारं सविसर्गञ्च प्रातःसूर्य्यसमद्युतिम् ।
स्त्रीणां ललाटे विन्यस्य वश्यतां नयते ध्रुवम् ॥
तथैव नासामुरसि ध्यातश्चैवोपकारकृत् ।
सुसमाहितचित्तेन न्यस्तन्तु प्रमदालये ॥
सकामां कामिनीं कुर्य्यात् स्खलन्मदजलाकुलाम् ।
यस्तु जुहुयादयुतं शुचिः प्रयतमानसः ॥
दृष्टिमात्रे सदा तस्य वशमायान्ति योषितः ॥
मनःशिला पत्रकञ्च सगोरोचनकुङ्कुमम् ॥
एभिः कृते च तिलके सदा स्त्री वश्यतामियात् ॥
सहदेवो भृङ्गराजः सितापराजिता वचा ।
तेनैव तिलकं कृत्वा त्रैलोक्यं वश्यतां नयेत् ।
गोरोचना मीनपित्तमाभ्याञ्च कृतवर्त्तिकाम् ॥
यः पुमांस्तिलकं कुर्य्याद्वामहस्तकनिष्ठया ।
स करोति वशं सर्व्वं त्रैलोक्यं नात्र संशयः ॥
गोरोचना महादेव ! ऋतुशोणितभाविता ।
ततो या कृततिलका सा नारी यं निरीक्षते ॥